# Sharada PancharatnastutiH

# शारदापञ्चरत्नस्तुतिः

## Document Information

Text title : Sharada Pancharatna Stutih

File name : shAradApancharatnastutiH.itx

Category : devii, pancharatna, sarasvatI, stuti, devI

Location : doc_devii

Acknowledge-Permission: Sringeri Math https://www.sringeri.net/

Latest update : May 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 13, 2025

*sanskritdocuments.org*

# शारदापञ्चरत्नस्तुतिः

श्रीमच्छङ्करदेशिकेन्द्ररचिते तुङ्गापगातीरगे
शृङ्गेर्याख्यपुरस्थिते सुविमले सन्मौनिसंसेविते ।
पीठे तां रविकोटिदीप्तिसहितां राराज्यमानां शिवां
राजीवाक्षमुखामरार्चितपदां वन्दे सदा शारदाम् ॥ १॥

पादानम्रजनार्तिनाशनिपुणां नादानुसन्धायिनीं
वेदान्तप्रतिपाद्यमानविभवां वादादिशक्तिप्रदाम् ।
विद्याकल्पलतां चतुर्मुखमुखाम्भोजातसूर्यायितां
विद्यातीर्थगुरूत्तमैरहरहः संसेव्यमानां भजे ॥ २॥

ईषत्स्मेरमुखाम्बुजां कुचभरानम्रां त्रिलोकावनीं
दैत्यव्रातविनाशिनीं कचजितप्रावृड्पयोदां शिवम् ।
संसारार्णवमग्नदीनजनतासन्तापसन्नाशिनीं
वन्दे तां शुभदामनन्यशरणः स्वान्ते सदा शारदाम् ॥ ३॥

कारुण्यामृतवारिराशिमनिशं केयूरहारैर्वृतां
कामारेस्सहजां कराब्जविलसत्कीरां कुबेरार्चिताम् ।
कामक्रोधमुखारिवर्गशमनीं कैवल्यसम्पत्प्रदां
कञ्जोद्भूतमनःप्रियां हृदि भजे भक्त्या सदा शारदाम् ॥ ४॥

नित्यानित्यविवेकदाननिपुणां स्तुत्यां मुकुन्दादिभिः
यत्याकारशशाङ्कमौलिविनुतां सत्यापितस्वाश्रवाम् ।
नत्या केवलमेव तुष्टहृदयां त्यक्त्वा”न्यदेवानहं
भक्त्या मे हृदयाम्बुजे नवरतं वन्दे सदा शारदाम् ॥ ५॥

इति शारदापञ्चरत्नस्तुतिः समाप्ता ।

*Sharada PancharatnastutiH*

pdf was typeset on May 13, 2025

Please send corrections to *sanskrit@cheerful.com*